**DRISHTIKON**, 15(1), RMC, MMC, DHARAN, ISSN: 2382-5456, 2025.

# संस्कृतसाहित्यविकासे नेपालदेशीयानां संस्कृतमहाकाव्यानां योगदानम्

**महानन्दतिमिल्सिना, विद्यावारिधिः**

सहप्राध्यापकः

संस्कृतसाहित्यम्

नेपाल–संस्कृतविश्वविद्यालयः, पिण्डेश्वरविद्यापीठम्, धरानः, सुनसरी, नेपालः

Email: timsinamahananda@gmail.com

https://doi.org/10.3126/dristikon.v15i1.77144

**लेखसारः**

संस्कृतसाहित्यं समृद्धं विधातुं प्राकृतिकदृष्ट्यातिरमणीयस्य बुद्धस्य जन्मभूमेर्नेपालदेशस्य महद्योगदानमस्ति । नेपालभारतादिषु विविधदेशेषु विरचितैर्महाकाव्यनाटकगद्यकाव्यादिभिः संस्कृतवाङ्मयं समुन्नतं जातमस्ति । नेपालदेशे विरचितानां महाकाव्यानामपि संस्कृतवाङ्मयस्य श्रीवृद्धये महती भूमिका दृश्यते । रामायणमहाभारतादिभिर्ग्रन्थैर्विकसितं संस्कृतसाहित्यमद्यापि विकासवर्त्मनि धावन्नस्ति । महाकाव्यलेखनपरम्परायां अश्वघोषस्य सौन्दरानन्दम्, बुद्धचरितम्, कालिदासस्य कुमारसम्भवमहाकाव्यम्, रघुवंशमहाकाव्यम्, भारवेः किरातार्जुनीयम्, माघस्य शिशुपालवधम्, श्रीहर्षस्य नैषधीयचरितञ्चेति महाकाव्यानि सुप्रसिद्धानि सन्ति । आर्षमहाकाव्यप्रणयनानन्तरं रसभावप्रधानानि सुकुमारमार्गि-विचित्रमार्गिमहाकाव्यानि च रचितानि दृश्यन्ते । नैपालैः संस्कृतमहाकविभिः प्राचीनकालादेव विविधानि महाकाव्यानि विरचय्य संस्कृतवाङ्मयं संस्कृतसाहित्यञ्च बहूपकृतं विलोक्यते । नैपालसंस्कृतमहाकाव्यपरम्परायां वंशमणेर्हरिकेलिमहाकाव्यस्य, सुकृतिदत्तपन्तस्य कार्तवीर्योदयमहाकाव्यस्य च काव्यकलादृष्ट्या उत्कृष्टं स्थानं वर्तते, एतानि महाकाव्यानि समुत्कृष्टैः संस्कृतमहाकाव्यैः सह प्रतिस्पर्धीन्यपि सन्ति । नैपालसंस्कृतमहाकाव्यानां विषयवस्तु विविधक्षेत्रसम्बद्धं वर्तते । अधिकानां महाकाव्यानां कथावस्तु पुराणेतिहाससम्बद्धं दृश्यते । सामाजिकक्षेत्रे लब्धप्रतिष्ठस्य सज्जनस्य विषये रचितानि महाकाव्यान्यपि दृश्यन्ते । ऐतिहासिक-पौराणिक-विषयवस्तून्यपि कविप्रतिभया वर्णनचातुर्येण चमत्कारितया प्रस्तुतानि सन्ति । एतानि महाकाव्यानि भामहविश्वनाथादिभिः प्रस्तुतं महाकाव्यलक्षणमनुसृत्य लिखितानि सन्ति । एभिर्महाकाव्यैस्तात्कालिक-सामाजिकजनजीवनस्य चित्रणमपि प्रस्तुतं विद्यते । आदर्शसमाजनिर्मित्यै महाकाव्यानि अपि नूनं सहायकानि सिद्ध्यन्ति । नैपालकैर्महाकविभिर्विरचितानामेतादृशानां महाकाव्यानां संस्कृतमहाकाव्यपरम्परायां कीदृशं स्थानमस्तीति समस्यायामयं लेखः केन्द्रितो विद्यते । संस्कृतवाङ्मयस्य समृद्धये नैपालैर्महाकविभिर्विरचितानां महाकाव्यानां कीयदवदानमस्तीति विषये लेखोऽयं तथ्यं प्रकाशयति । अत्र महाकाव्यसिद्धान्तदृशा नैपालानां संस्कृतमहाकाव्यानां समीक्षणं कृतमस्ति । विश्वसंस्कृतसाहित्यसमक्षं नैपालानां महाकाव्यानामुपस्थितिः कीदृशी अस्तीत्यस्मिन् विषयेऽधुनापर्यन्तं विस्तृतरूपेण केनापि समीक्षकेन प्रकाशितं नैवावलोक्यते । अप्रकाशितस्य विषयस्यास्य प्रकाशनं लेखस्योद्देश्यमस्ति । अत्र नैपालकैः संस्कृतकविभिर्विश्वसंस्कृतसाहित्यस्य समृद्धये प्रदत्तस्य योगदानस्य प्रकाशनं विहितमस्ति । लेखेऽस्मिन् वर्णनात्मक-व्याख्यात्मकविधिना च सामग्रीणां विश्लेषणं कृतं विद्यते । मूलतः संस्कृतवाङ्मयस्य विकासे सम्बर्द्धने च नैपालानां संस्कृतमहाकाव्यकाराणां योगदानस्य समीक्षणमेवास्य लेखे प्रस्तुतमस्ति ।

*बीजशब्दाः* नेपालकसंस्कृतमहाकाव्यम्, महाकाव्यसिद्धान्तः, हरिकेलिमहाकाव्यम्, कार्तवीर्योदयः

## विषयपरिचयः

नैपालकसंस्कृतमहाकाव्यस्य विकसनशीला परम्परा वर्तते । नैपाले संस्कृतमहाकाव्यस्य तादृशी सुदीर्घपरम्परा तु न दृश्यते तथापि पश्चाद्वर्तिनि समयेऽत्रापि नैकानि महाकाव्यानि संरचितानि दृश्यन्ते । विश्वनाथादिभिः साहित्यशास्त्रिभिः प्रस्तुतानां महाकाव्यसिद्धान्तानुसारेणैवात्र महाकाव्यानि विरचिचानि संलक्ष्यन्ते । तत्र वंशमणिशर्मणो श्रीमद्भागवतस्य दशमस्कन्धस्य पूर्वार्द्धे

वर्णितकथासम्बद्धं हरिकेलिमहाकाव्यं नेपालदेशस्य प्रथमं संस्कृतमहाकाव्यं मन्यते। तथैव यज्ञशर्मसूरिणा चन्द्रसम्भवमहाकाव्यम्, सुकृतिदत्तपन्तेन कार्तवीर्योदयमहाकाव्यं च रचितम्। तत्र नैषधीयचरितानुकारि तत्प्रतिस्पर्धि च कार्तवीर्योदयमहाकाव्यं संस्कृतसाहित्यस्य विचित्रमार्गपरम्पराया उत्कृष्टमुदाहरणं वर्तते। पूर्णप्रसादब्राह्मणदुवाडिना सत्यहरिश्चन्द्रमहाकाव्यं रचितम्। अत्र सूर्यवंशे जातस्य सत्यव्रतस्य राज्ञो हरिश्चन्द्रस्य त्यागोज्ज्वलचरितस्य वर्णनं विद्यते। भरतराजघिमिरेमन्थलीयेन महेन्द्रोदयमहाकाव्यं प्रणीतम्। महाकाव्येऽनेन महेन्द्रपूर्वजानां महेन्द्रस्य राज्ञश्च वर्णनं विहितम्। हरिप्रसादाचार्यः शाहवंशीयानां राज्ञां वर्णनपरमितिहासप्रधानं गोरक्षशाहवंशमहाकाव्यं रचयामास। कृष्णप्रसादघिमिरेमहोदयेन श्रीकृष्णचरितामृतम्, ययातिचरितम्, नाचिकेतसम्, वृत्रवधः, गौरीगिरीशश्च महाकाव्यं प्रकाशितम्। पौराणिकविषयसम्बद्धान्यस्य महाकाव्यानि रसभावभरितानि लक्ष्यन्ते। एवमेव पशुपतिझानाम्ना महाकविना ऐतिहासिकविषयपरं नेपालसाम्राज्योदयमहाकाव्यं रचितम्। एवञ्च भीमकान्तपन्थिना पौराणिकविषयसम्बद्धं जगदम्बिकावैभवमहाकाव्यं जगदीश्वरवैभवमहाकाव्यञ्च प्रकाशितम्। माधवभट्टराईमहोदयेन सत्यसाईचरितमहाकाव्यम्, विष्णुराज आत्रेयेण हनूमदयनमहाकाव्यम्, आचार्यपूर्णचन्द्रोपाध्यायढुङ्गेलेन देवाधिदेवश्रीनीलकण्ठमहाकाव्यम्, विष्णुप्रसादशर्मादेवकोटामहोदयेन नेपालगौरवं महाकाव्यञ्च प्रणीतमस्ति। एतादृशैर्नैपालैर्महाकाव्यैः संस्कृतसाहित्यस्योन्नयने महद्योगदानं प्रदत्तमस्ति। एभिर्महाकविभिर्विविधकाव्यशास्त्रिभिः प्रतिपादितानां महाकाव्यसिद्धान्तानामाधारेण महाकाव्यानि लिखितानि दृश्यन्ते।

**समस्याकथनम्**

संस्कृतसाहित्यविकासे नेपालदेशीयानां संस्कृतमहाकाव्यानां योगदानम् इत्यस्मिन् लेखे निम्नाङ्किते समस्ये समागते स्तः -

क. नेपालदेशीयानां संस्कृतमहाकाव्यानां परम्परा कीदृशी ?

ख. संस्कृतसाहित्यविकासे नेपालदेशीयानां संस्कृतमहाकाव्यानां स्थानं कीदृशम् ?

**उद्देश्यम्**

अध्ययनमेतत् निम्नाङ्कितयो उद्देश्ययोः केन्द्रितमस्ति –

क. नेपालदेशीयानां संस्कृतमहाकाव्यानां परम्पराप्रकाशनम्,

ख. संस्कृतसाहित्यविकासे नेपालदेशीयानां संस्कृतमहाकाव्यानां स्थाननिर्धारणम्,

**सीमा**

एतस्मिन्नध्ययने संस्कृतसाहित्यविकासे नेपालदेशीयानां संस्कृतमहाकाव्यानां योगदानविषये समीक्षणं कृतं विद्यते। नैपालकैः साहित्यसाधकैः संस्कृतभाषायां नैकानि खण्डकाव्यानि नाटकानि कविता-गद्यकाव्यानि च लिखितानि सन्ति। परमस्मिन् लेखे नैपालकसंस्कृतमहाकाव्यातिरिक्तानां विषयाणां विवेचनं नैव विहितमस्ति। नैपालकानां संस्कृतमहाकाव्यानामपि संस्कृतकाव्यसिद्धान्तानुसारेण गभीररूपेण समीक्षणं नैव कृतमस्ति। अत्र केवलं नैपालकानां संस्कृतमहाकाव्यानां परम्पराविषयकं विहगावलोकनं प्रकाशितमस्ति। इयमेवास्य लेखस्य सीमा।

**पूर्वकार्यसमीक्षा**

लेखेऽस्मिन् संस्कृतसाहित्यविकासे नेपालदेशीयानां संस्कृतमहाकाव्यानां योगदानविषये चर्चा विहिता वर्तते। एतत्शीर्षकसम्बद्धानि पूर्वकार्याणि क्रमिकरूपेणात्र सङ्क्षेपेण प्रस्तूयन्ते -

डा.लक्ष्मीकान्तपन्थी *जगदम्बिकावैभवम्* (२०५५) इति महाकाव्यस्य भूमिकायामस्य वैशिट्यं प्रकाशयति, यत् - संस्कृतभाषानिबद्धायाः शिक्षाप्रणाल्याः, धर्मस्य, आचारस्य, संस्कृतेश्च अवनत्यवसरे पाश्चात्यसंस्कृतितः आक्रान्तायां जीवनपद्धत्यामेतादृशे समये आध्यात्मिकता-धर्मशास्त्रीयाचरण-मेलनमित्यादिभिर्हिन्दुधर्मस्य निगूढप्रसङ्गैः परिपूरितस्यैतादृशस्य काव्यस्य प्रणयनं न केवलमस्माकं गौरवस्य विषयः, अपि तु नेपालीयसंस्कृतजगतोऽपि गौरवास्पदमित्यहं मन्ये (पन्थी, २०५५, पृ. घ)।

डा.टीकारामपन्थी *जगदीश्वरवैभवम्* (२०५५) इति महाकाव्यस्य भूमिकायामस्य महाकाव्यस्य वैशिट्यं प्रदर्शयति, यत्- अद्यतने अर्थकामे प्रधाने युगे समुपलभ्यमाना काव्यकृतिरेषाऽस्माकं कृते गौरवमयी, आत्मप्रशोधिनी, शाश्वतमार्गप्रदर्शिनी, हृदयपावनी चेति नि:सन्देहं वक्तुं शक्यते । एवञ्च परमेश्वरानुचर:, लोककल्याणकर:, काव्यसंसारविचरणपर: कविवर: पं.भीमकान्तपन्थिमहोदय: सर्वथा साधुवादैर्वरिवस्यतव्य: । (पन्थी, २०५५, पृ. ट )

टीकारामपन्थी *हरिकेलिमहाकाव्यम्* (२०५१) इति वंशमणिशर्मणा विरचितस्य वेणीमाधवढकालेन ससमीक्ष्यं प्रकाशितस्य हरिकेलिमहाकाव्यस्य भूमिकायामस्य महत्तां प्रस्तौति - सप्तदशसु सर्गेषु विभक्तं काव्यमिदं पौराणिकीं कथामाश्रित्य प्रणीतम् । यत्र भगवत: श्रीकृष्णस्य जन्मत आरभ्य कंसवधपर्यन्ता लीलाकथा वर्तन्ते । प्रकृतं काव्यं साहित्यशास्त्रीयमहाकाव्यलक्षणं याथार्थ्येनावलम्ब्य सन्निबद्धं वर्तते । जगदात्मतत्त्वं परमेश्वरो हरिर्नायक:, वृषभानुसुता राधा नायिका, शृङ्गारोऽङ्गी रस:, वीरशान्ताद्भुतभयानकरौद्रा अङ्गभूता रसा:, सन्ध्या-चन्द्रोदय-सूर्योदय-ध्वान्त-वन-पर्वत-नद्यादीनां यथास्थानं वर्णनम् (पन्थी, २०५१, पृ. च)

स्वामी प्रपन्नाचार्य *कार्तवीर्योदयमहाकाव्यम्* (२०५१) इति सुकृतिदत्तपन्तविरचितस्य ग्रन्थस्य भूमिकायां महाकाव्यस्य वैशिष्ट्यं प्रकाशयति - पदबन्धेन महाकाव्यमिदं माघकृतेन शिशुपालवधमहाकाव्येन श्रीहर्षकृतेन वा नैषाधीयचरितमहाकाव्येन तुलयितुं शक्यते । परन्तु तत्र काव्ययो: यादृशी स्वाभाविकता द्रष्टुं शक्यते, तादृशी स्वाभाविकताऽत्र सुदुर्लभा । काव्याचार्यै: शक्ति: व्युत्पत्तिरभ्यासश्चेति त्रितयं काव्यहेतुतयाऽङ्गीकृतम् । तेषु त्रिषु कुत्रचित् कविषु शक्तेरन्यत्र व्युत्पत्तेरपरत्राभ्यासस्य प्राधान्यं द्रष्टुं शक्यते । प्राधान्याप्राधान्यप्रसङ्गेऽपि यथास्थानमेतेषु प्रत्येकमनुपातभेदोऽपि भवति । कालिदासीयेषु काव्येषु शक्तिरेव प्राधान्येन हेतुभूतास्ति । इतरयो: गुणभाव एव । सुकृतिदत्तकृते कार्तवीर्योदयनाम्नि महाकाव्ये व्युत्पत्तेरेवास्ति प्राधान्यम् (प्रपन्नाचार्य, २०५१, पृ. प्रस्तावना) ।

माधवभट्टराई *ऋतम्भरा* (वर्ष-४, अङ्क-७, २०५७) अनुसन्धानमूलिकायां पत्रिकायां संस्कृते महाकाव्यनिर्माणस्य परम्परा इति शीर्षके संस्कृतमहाकाव्यस्य विकासप्रदर्शनक्रमप्रकाशने नैपालकानां संस्कृतमहाकाव्यानामपि चर्चां विदधाति यत् - नेपाले च पूर्णप्रसादब्राह्मणरचितं सत्यहरिश्चन्द्रम्, हरिप्रसादाचार्यकृतो गोरक्षशाहवंश:, भरतराजशर्मप्रणीतं महेन्द्रोदयम्, कृष्णप्रसादघिमिरेप्रणीतानि श्रीकृष्णचरितामृत-गौरीगिरीश-नाचिकेतस-वृत्रवध-ययातिचरिताभिधानानि पञ्चमहाकाव्यानि, पशुपतिझाप्रणीतं नेपालसाम्राज्योदयं भीमकान्तपन्थिप्रणीतं जगदम्बिकावैभव-जगदीश्वरवैभवनामकमहाकाव्ययुगलञ्च मुख्यानि महाकाव्यानि सन्ति । एवं विंशतिशताब्द्या अन्तिमे भागे विज्ञानजडीभूते विज्ञवर्गे स्वार्थोन्मुखे चास्मिन् युगे संस्कृतकविभि: सम्मानस्य, पुरस्कारस्य, प्रोत्साहनस्य, जीवनवृत्तेश्चापेक्षामकृत्वा यानि महाकाव्यानि प्रणीतानि, तानि स्वसंस्कृतिपोषकै: सुरगवीसमुपासकैरङ्गीकृतराष्ट्रियतागर्वै: सर्वैरभिनन्दनीयानि वन्दनीयानि चेति मदीया प्रतीति: (भट्टराई, २०५७, पृ. ८)

माधवशरणोपाध्याय: *ऋतम्भरा* (वर्ष-३, अङ्क-५, २०५५) इत्यनुसन्धानमूलिकायां पत्रिकायां सुकृतिदत्तपन्तदर्शितसरण्या संज्ञासूत्रत्वम् इति लेखे महाकाव्यरचयितु: सुकृतिदत्तस्य विषये चर्चां विदधाति, यत् - नेपालदेशस्य वाग्लुङमण्डलस्य ओखले नामके ग्रामे १८८० वैक्रमाब्दे भार्गवीभवदत्तयोश्चतुर्षु पुत्रेषु कनिष्ठपुत्रत्वेन जातस्य सुकृतिदत्तपन्तस्य नाम संस्कृतकाव्यरसिकेषु न तिरोहितम् । न केवलं काव्यप्रणयने एवास्य विदग्धस्य नैपुण्यमपि तु न्यायव्याकरणादिविषयेष्वप्यासीदाधिकारिकं वैदुष्यमिति गम्यते तत्तद्विषयग्रन्थाध्ययनेन । विदुषोऽस्य पाण्डित्यपूर्णं महाकाव्यं कार्तवीर्योदयनामकं सम्पाद्य भूमिकायां चास्य जन्मकर्मादिविषयतथ्यप्रकाशनेन च महत्त्वपूर्णं कार्यं डा.स्वामिप्रपन्नाचार्येण कृतमिति न तिरोहितमस्ति प्रेक्षावताम् (उपाध्याय, २०५५, पृ.१७)

विद्यानाथ उपाध्यायो भट्ट *कार्तवीर्योदयमकरन्द* (२०६९) इति वेणीमाधवढकालेन सम्पादितस्य कार्तवीर्योदयमहाकाव्यस्याष्टम-नवमसर्गयोर्व्याख्याकेन्द्रितस्य पुस्तकस्य भूमिकायां महाकाव्यस्य महत्तां प्रकाशयति यत् - नेपालस्य महाकाव्येषु तस्य स्थानं महनीयं काव्यशास्त्रदृष्ट्या , शिल्पविद्यावीक्षया चातीव विशष्टम्, तन्निष्ठं दार्शनिकं चिन्तनं वैदुष्यास्पदम्, भावपक्षो हर्दयग्राही, तत्रत्यो धर्मशास्त्रविषयाणां समावेश: प्रशस्य:, कलापक्षोऽतीव सुन्दर:, पद्यानि उत्कृष्टानि, प्रबन्धविधानं च

प्रकृष्टमिति एतावन्तो गुणगणा महाकाव्यस्य प्रकर्षं प्रकाशयन्तो ग्रन्थकृत: सुकृतिदत्तपन्तमहाभागस्य कवित्वम्, पाण्डित्यम्, कौशलम्, शिल्पम्, नैपुण्यञ्च विततं तन्वते। विशेषतो महाकाव्ये निबद्धानां ग्रन्थीनां भञ्जनन्तु विशिष्टकवीनां मूर्धन्यविदुषाञ्चापि दुष्करमिति काव्यमेतद् विदुषामपि परीक्षास्थानम् (भट्ट, २०६९, पृ. २)

योगी नरहरिनाथ: *महेन्द्रोदय:* (२०१७) इति भरतराजशर्मणा विरचितस्य महाकाव्यस्य भूमिकायां महेन्द्रोदयपरिचयशीर्षके विविधै: श्लोकैरस्य महाकाव्यस्य महत्तां प्रकाशयति -

देशेतिहासमवलम्ब्य समासतोऽपि दिव्योपदेशविशदं सदसद्विवेक:।
खड्गादिबन्धलसितं रसभावपूर्णं काव्यं व्यधान्नवकविर्भरत: प्रकृष्टम्॥
टीका कृता लसत मन्थलिवासिनैव सत्यालवंशतिलकेन च शङ्करेण।
विद्यार्थिभि: कविजनैर्विबुधैनरेन्द्रै: काव्यं शुभं नरहरिर्भणतीदमीक्ष्यम्॥
श्रीपृथ्वीनारायणकालिकानां कवीश्वराणां सरणीं प्रशस्ताम्।
पुनर्महेन्द्रोदयकाव्यबनधात् समुद्धृत: मञ्चतु विद्वदोघ:॥ (नरहरिनाथ:, २०१७, पृ. छ)

जीवन अधिकारी *प्रज्ञाप्रवाह* (ई.२०१०) पत्रिकाया यदुवंश महाकाव्यको साहित्यिक वैशिष्ट्य इति शीर्षके नैपालकेन सर्जकेन काशिनाथशर्मणा विरचितस्य यदुवंशमहाकाव्यस्य वैशिष्ट्यं प्रतिपादयति - अस्य महाकाव्यस्य नैकेषु सर्गेषु पृथक्पृथक्लकारयुतानां क्रियापदानां प्रयोगोऽवाप्यते। काव्यमिदं भट्टिकाव्येन सह तुलयितुं शक्यते। अत्र नैकाभि: सूक्तिभि: आदर्शसमाजनिर्मित्यै प्रयत्नो विहित:। अस्मिन् काव्ये वेद-वेदान्त-न्याय-मीमांसा-व्याकरण-आयुर्वेदादिशास्त्राणां मर्मप्रकाशका: प्रयोगा: सर्वत्र प्राप्यन्ते। अस्मात् सन्दर्भात् महाकवेर्विविधशास्त्रगता व्युत्पत्ति: प्रकाश्यते। राजचरितवर्णने केन्द्रितं काव्यमिदं वीररसप्रधानमस्ति (अधिकारी, ई.२०१०, पृ.१०१)।

गुरुप्रसादकोइराला गवेषणा (२०७५) अनुसन्धानमूलिकाया: पत्रिकाया: कवेर्माधवस्य कृतित्वपरिशीलनम् इति शीर्षके महाकाव्यकर्तुर्माधवभट्टराईमहोदयस्य महाकाव्यगतं वैशिष्ट्यं प्रकाशयति - कवेर्माधवस्य कवित्वं कृतित्वञ्च गौरवपूर्णमस्ति। शैशवादारभ्य अधुनापर्यन्तं सामयिकविषयमवलम्ब्य रचिता स्फुटा रचना: कवेरस्य सुबोध्यगुणसमन्वितं कृतित्वं प्रकाशयति। एतस्य २०५८ तमे वैक्रमाब्दे प्रकाशितं सत्यसाईचरिताख्यं महाकाव्यं पञ्चदशसर्गान्वितं कवित्वोत्कर्षप्रकाशकं विद्यते। तात्कालिकश्रीपञ्चसर्वकारस्य शिक्षाविभागस्यानुरोधेन सरलसुबोध्यशैल्या माध्यमिकस्तरीयाणां संस्कृतभाषासंस्कृतसाहित्यसम्बद्धानां पाठ्यग्रन्थानां लेखनञ्चास्य कृतित्वगुणप्रकाशकं दृश्यते। (कोइराला, २०७५, पृ.१२)।

गुरुप्रसादकोइराला *प्रज्ञाज्योति* (२०७८) अनुसन्धानमूलिकाया: पत्रिकाया: चन्द्रसम्भवमहाकाव्ये मौद्गल्यवंशबीजवैशिष्ट्यम् इति शीर्षके महाकवेर्यज्ञशर्मसूरिणो महाकाव्यगतं वैशिष्ट्यं प्रस्तौति - यज्ञशर्मसूरि नैपालकसंस्कृतकविषु प्राचीनोऽस्ति। अयं भगवतश्चन्द्रमस: प्रवर्तितं गुणगणगरिष्ठं चन्द्रवंशमाधृत्य चन्द्रवंशमहाकाव्यं प्रणीतवान्। अत्र कविना चन्द्रवंशस्य विशिष्टगुणसम्पन्ना: सर्वे वंशजा वर्णनविषयीकृता। (कोइराला, २०७८, पृ.२२)।

अनेन प्रकारेण नैपालकसंस्कृतमहाकाव्यस्य विषये विविधैः समीक्षकैर्विविधेषु सन्दर्भेषु समीक्षणं कृतं दृश्यते। मूलत: समीक्षकैर्भिन्नभिन्नरूपेण विभिन्नानां महाकाव्यानां विषये स्वकीयविचाराः प्रस्तुताः। परं संस्कृतसाहित्यविकासे नेपालीयानां सकलानां महाकाव्यानां विवेचनं संस्कृतवाङ्मयप्रवर्द्धने चैतेषां स्थाननिर्धारणञ्च नैव कृतमवलोक्यते। अतोऽनुसन्धानमेतत् नवीनविषयप्रतिपादने समर्थोऽस्तीति ज्ञायते।

## शोध सामग्री: एवम् विधिः

एतदध्ययनं गुणात्मिकायामनुसन्धानपद्धत्यामाधारितं वर्तते। अध्ययनेऽस्मिन् पुस्तकालयीयानां सामग्रीणामुपयोगोऽस्ति। नैपालकमहाकविभिर्विरचितानि संस्कृतमहाकाव्यान्यप्यत्र प्राथमिकसामग्रीरूपेण प्रस्तुतानि सन्ति। महाकाव्यविषये लिखिता विचाराः, लेखाश्चात्र सङ्कलनं विधाय विश्लेषणं कृतमस्ति। अत्र सङ्कलितानां सामग्रीणां व्याख्याविश्लेषणे वर्णनात्मकस्य व्याख्यात्मकस्य च विधेरुपयोगो विहितो वर्तते।

### विषय-विश्लेषणम्

संस्कृतसाहित्यस्य विकासे नेपालदेशस्य योगदानं चर्चायोग्यमस्ति। प्राचीनकालेऽपि नेपालदेशे संस्कृतभाषायाः विकासोऽभूदिति ऐतिहासिकग्रन्थानामध्ययनेन ज्ञायते। तदा कलासङ्गीतसाहित्यक्षेत्रेषु महती समुन्नतिरभूदिति इतिहासकारा मन्यन्ते (अधिकारी, २०६६, ९२-१०१)। प्राचीने लिच्छविकाले समुट्टङ्किताः संस्कृतभाषानिबद्धा द्विशताधिकाः शिलालेखा अमुमेव तथ्यं प्रमाणयन्ति। मल्लशासनकाले संस्कृतभाषानिबद्धान्यनेकानि नाटकानि महाकाव्यानि च रचितानि इति ज्ञायते। नेपालदेशे संस्कृतभाषाया विकासे स्वर्णयुगरूपेण परिचिते लिच्छविकाले संस्कृतसाहित्यस्याधिका श्रीवृद्धिर्जातेत्यभिलेखमाध्यमेन ज्ञायते परं तदा महाकाव्यात्मिकी रचना न दृश्यते। महाकाव्यरचना तु मल्लकाल एव प्रारब्धा जाता इति वक्तुं शक्यते (पोखरेल, २०६६, ११३-१२१)। नेपालदेशीयानां संस्कृतमहाकाव्यानां सङ्क्षेपेण परिचयोऽध: प्रस्तूयते -

#### हरिकेलिमहाकाव्यम्

सहजया प्रतिभयाऽनुपमेन च वैदुष्येण समन्वितस्य वंशमणिशर्मणो हरिकेलिमहाकाव्यं नेपालस्य प्रथमं महाकाव्यमस्ति। भक्तपुरस्य राज्ञो जगज्ज्योतिर्मल्लस्य सभापण्डितोऽयं कविर्भारद्वाजकुलोत्पन्नस्य रामचन्द्रशर्मणः पुत्रोऽस्ति। अस्य समयः वैक्रमस्य १६४० तमात् वत्सरात् पश्चात् १७१४ तमात् वत्सराच्च पूर्वमासीदिति ज्ञायते। साहित्यसङ्गीतमर्मज्ञस्य जगज्ज्योतिर्मल्लस्याश्रयेण वंशमणेः प्रतिभा विकसिता जाता। कविना रचितेष्वन्येषु ग्रन्थेषु चतुरङ्गतरङ्गिणी, सङ्गीतभास्करः, गीतदिगम्बरश्च प्राप्यते। वंशमणेर्गीतदिगम्बरं नाम रूपकं कान्तिपुराधिपतिना प्रतापमल्लेन कृतस्य तुलादानस्यावसरेऽभिनयाय रचितमासीत् (ढकाल, २०५१ : ८)। श्रीमद्भागवतस्य दशमस्कन्धस्य पूर्वार्द्धे वर्णितां श्रीकृष्णप्रादुर्भावात् कंससंहारं यावद् विद्यमानां घटनामाश्रित्य रचितं हरिकेलिमहाकाव्यं सप्तदशसर्गान्वितं वर्तते। कमनीयकाव्यकलाभिरलङ्कृतेऽस्मिन् महाकाव्येऽङ्गी रसः शृङ्गारोऽस्ति। अत्र पदलालित्यस्याधिकः प्रयोगः प्राप्यते, तथैवात्र चित्रकाव्यस्य प्रयोगोऽपि दृश्यते। पौराणिकविषयवस्तु अवलम्ब्यापि कविरत्र कल्पनाशीलतां नूतनताञ्च प्रकटितवान्। रसानुकूला रचना, विलक्षणा कल्पना, चित्रालङ्काराणां प्रयोगः, गहना दार्शनिकता, परमेश्वरस्य स्तुतिः, जीवनोपयोगिनां सूक्तीनां प्रयोगः, मनोहारिप्रकृतिचित्रणं चेति वैशिष्ट्यैरलङ्कृतमिदं महाकाव्यं नैपालसंस्कृतमहाकाव्यपरम्परायामद्वितीयं रत्नमेव वर्तते। हरिकेलिमहाकाव्यस्योदाहरणपद्यानि यथा -

विलासिनीनां जलकेलिकाले नितम्बबिम्बस्थगितस्तटिन्याः।
पतन् कुचाद्रौ पृथुलः प्रवाहः शशंस सिन्धोरिव सेतुबन्धम्॥ (१२/१०)।
मरुन्मन्दं मन्दं वहति मतिवन्मन्थरमतेः शशी दीव्यत्युच्चैरुपचित इव क्षोणितिलकः।
हसन्ते रोगार्ता इव रजनयश्चानुदिवसं वशं कामस्याप्ता रतय इव सर्वा युवतयः॥ (११/१३)।
हारं हृदो हरसि कर्षसि मौलिरत्नं यत्नं करोषि कुचकञ्चुकमोचनाय।
व्यक्तं वद प्रकृतिसुन्दर नन्दसूनो पाटच्चरोऽसि चरतां किमु कामुकोऽसि ? (११/१३)

#### चन्द्रसम्भवमहाकाव्यम्

नेपालदेशस्य स्याङ्जामण्डलस्य आँधिखोला इत्यभिधेये ग्रामे समुत्पन्नेन यज्ञशर्मसूरिणा चन्द्रसम्भवमहाकाव्यं प्रणीतम्। कृष्णागण्डक्याः पावने तटे रुरुक्षेत्रेऽवस्थायानेन काव्यरचना विहिता। मौद्गल्यगोत्रीयो यज्ञशर्मा (कोइराला) रणबहादुरशाहस्य समकालिक आसीत्। स्ववंशाभिमानिना पितृभक्तेन कविना पितृसम्मोदकामनया काव्ये गणपत्यादिपाञ्चायनदेवानां नमस्कारात्मकमङ्गलाचरणादारभ्य चन्द्रवंशे उत्पन्नानां राज्ञां वर्णनं विहितम्। महाकाव्यस्यान्ते कवेर्वंशस्य वर्णनमपि विद्यते। पौराणिकविषयाश्रिते शान्तरसप्रधानभूतेऽस्मिन् महाकाव्ये सरलसंस्कृतभाषानिबद्धास्त्रयोदश सर्गाः सन्ति। महाकाव्यस्य प्रमुखनायकः कविगोत्रप्रवर्तको मुद्गल एवास्ति परमत्र दुष्यन्तपुत्रस्य भरतस्य सौराज्यादिवर्णनमधिकं दृश्यते। महाकाव्यमेतत् प्रसादगुणमयं वर्तते, रसगुणालङ्कारादिभिरलङ्कृतञ्चास्ति। महाकाव्यलक्षणकारनिर्दिष्टं लक्षणानुसारमेवेतत् काव्यं रचितं वर्तते। महाकाव्ये लेखकवंशसम्बद्धस्य कुलदेवता–पूजनोत्सवस्यापि विस्तृतं वर्णनमवाप्यते (पोखरेल, पूर्ववत् : ११५)। अस्य महाकाव्यस्योदाहरणपद्यानि -

या स्त्री साऽहल्यकानाम्नी रूपेण श्रीरिवापरा।
गौतमाय ददौ ताञ्च मुद्गलो मुनिचन्द्रमा॥ १२/२
शतानन्दाभिधं तस्यां गौतमोऽजनयत्सुतम्।
ब्रह्मवर्चस्विनं रम्यं सुरूपं सूर्यवर्चसम्॥ १२/३
तस्य सत्यधृतिः पुत्रो धनुर्वेदविशारदः।
शरद्वान्तत्सुतो यस्य ह्युर्वशीदर्शनात्किल॥
शरस्तम्बेऽपतद्रेतो मिथुनं चाभवच्छुभम्।
कृपः कुमारः कन्या च द्रोणपत्न्यभवत्कृपी॥ १०/५,६

**कार्तवीर्योदयमहाकाव्यम्**

१८८० तमे वैक्रमाब्दे बाग्लुङमण्डले जातेन सुकृतिदत्तपन्तेन कार्तवीर्योदयमहाकाव्यं रचितम्। एतत्काव्यरचनात् पूर्वमेवानेन सिद्धान्तवादः, स्फोटवादः रत्नावली, गङ्गाप्रसादः, मन्दारमाला, छन्दःप्रबन्धश्चेति षड्ग्रन्थाः प्रणीता आसन्। सप्तदशसर्गात्मकं कार्तवीर्योदयमहाकाव्यं संस्कृतसाहित्यस्य विचित्रमार्गपरम्पराया उत्कृष्टमुदाहरणं वर्तते। कार्तवीर्योदयं नैषधीयचरितानुकारि तत्प्रतिस्पर्धि च प्रतीयते। अत्र कृतवीर्यसूनोः सहस्रार्जुनस्य नारायणांशरूपस्यानुकरणीयजीवनस्य वर्णनमस्ति। भामहविश्वनाथसदृशैराचार्यैर्निर्दिष्टैर्महाकाव्यलक्षणैर्युक्तं व्युत्पत्तितत्त्वखचितं कार्तवीर्योदयं कवेः प्रतिभायाः प्रकर्षरूपं महनीयं महाकाव्यमस्ति। स्वजीवनस्योत्तरार्द्धे १९२८ तमे वैक्रमाब्दे रचितस्यास्य महाकाव्यस्य सप्तमसर्गे ‘अ’ इत्यतः ‘ज्ञ’पर्यन्तानां वर्णानां आद्यक्षररम्यैः पद्यैः शब्दालङ्कारस्य विचित्रा छटा निर्मिता। तथैवाष्टमे सर्गे मम्मटेन काव्यप्रकाशे प्रतिपादितानामर्थालङ्काराणामुदाहरणरूपेण कविना क्रमेण श्लोकरचना विहिता। शृङ्गारप्रधानभूतेऽस्मिन् काव्ये धर्म-नीति-समाज-दर्शनेतिहास-राजनीतिसम्बद्धा विषयाः समाविष्टाः सन्ति (प्रपन्नाचार्य, २०५१ : ९१)। अस्य महाकाव्यस्य उदाहरणपद्यम्-

कार्यं किमत्र भवतो जनरञ्जनं द्राक् ध्येयं किमस्ति मधुसूदनपादपद्मम्।
सेव्यं किमुज्ज्वलमतिद्विजवर्यवृन्दं हेयं किमैहिकसुखोत्सुकमर्त्ययूथम्॥ (८/६२)
उटजविपुलसौध: शान्तिराज्ञीविहारी शमदमसचिवाढ्य: कामकोपादिशत्रून्।
द्रुततरमभिभूय प्राप्तयोगाग्रभूमिर्व्यहरदतुलसौख्ये भूमिजानि: पुराण:॥ (८/९९)

**सत्यहरिश्चन्द्रमहाकाव्यम्**

१७७९ तमे वैक्रमाब्दे गोर्खामण्डले जातेन पूर्णप्रसादब्राह्मणदुवाडिना त्रयोदशसर्गान्वितं सत्यहरिश्चन्द्रमहाकाव्यं रचितम्। काष्ठमण्डपस्य ताहाचलटोल्लक–निवासिना कविनान्ये विश्वेदेवाः, तदर्थमेवेति रूपान्तरणात्मकः गीतिकाव्यग्रन्थः, ईशावास्यवृत्तिः (रूपान्तरणात्मिका), राजतन्त्रं सदा जीव्यात् इति च संस्कृतग्रन्थाः प्रणीताः सन्ति। एते सर्वे ग्रन्था मुद्रिता दृश्यन्ते। अस्य २००५ तमे वैक्रमाब्दे लिखितं सत्यहरिश्चन्द्रमहाकाव्यं प्राक् २००७ तमे वैक्रमाब्दे पुनः २०१७ तमे वैक्रमाब्दे च प्रकाशितं दृश्यते। नैपाललेखकेन लिखितमेतत् प्रथमं प्रकाशितं महाकाव्यम्। अत्र सूर्यवंशे जातस्य सत्यव्रतस्य राज्ञो हरिश्चन्द्रस्य त्यागोज्ज्वलचरितस्य वर्णनं विद्यते। अत्र मानवतावादस्य कर्मयोगस्य च विषयः प्रकटीभूतोऽस्ति। महाकाव्ये तात्कालिकराणाशासनस्य क्रूरताऽपि प्रकृतिवर्णनमाध्यमेन प्रकाशिताऽस्ति (पोखरेल, पूर्ववत् : ११६)।

**महेन्द्रोदयमहाकाव्यम्**

रामेछापमण्डले जातेन भरतराजघिमिरेमन्थलीयेन दशसर्गात्मकं महेन्द्रोदयमहाकाव्यं प्रणीतम्। शेषराजरेग्मिशिष्योऽसौ २०१७ तमे वैक्रमाब्दे महाकाव्यमिदं प्रणीतवान्। तदीयान्यन्यानि शैलबाला, मोतिरामवृत्तम्, कृष्णाभिसर्पणम् चेति खण्डकाव्यानि प्रकाशितानि सन्ति (कौडिन्यायन, २०४८ : ५८)। महेन्द्रोदये महाकाव्येऽनेन महेन्द्रपूर्वजानां महेन्द्रस्य राज्ञश्च वर्णनं विहितम्। मन्थलीयग्रामवास्तव्येन शंकरप्रसादसत्यालेन लिखितया संस्कृतटीकया समन्वितं महेन्द्रोदयं स्तुतिकाव्यपरम्परायाः संवर्धकं

महाकाव्यमस्ति। श्लोकसङ्ख्यादृष्ट्या स्वल्पकायमपि काव्यकलाभिरलङ्कृतमेतत् साहित्यजगति महत्त्वपूर्णं महाकाव्यं वर्तते। अस्य महाकाव्यस्योदाहरणम् -

लघुस्फुलिङ्गोऽप्यनलो दवायते दवोऽपि पाषाणतले प्रशाम्यति।
तथाहि काल: कुरुते बलाबलं भवेदसौ बालनृपोऽपि वीर्यवान्॥ (२/५)
महीन्द्रं तं महेन्द्रं सा महेन्द्रमिव वीक्ष्य दिक्।
प्रसन्नाऽभून्न का वा स्त्री पत्युर्योगेन तुष्यति॥ (८/२)

**गोरक्षशाहवंशमहाकाव्यम्**

नेपालदेशस्य प्युठानमण्डले १९९३ तमे वैक्रमाब्दे जनिं प्राप्तो हरिप्रसादाचार्य इतिहासप्रधानं विंशतिसर्गात्मकं गोरक्षशाहवंशमहाकाव्यं रचयामास। कविना महाकाव्यमेतत् २०२२ तमे वैक्रमाब्दे प्रणीतमासीत्। एतेन 'श्री ५ महेन्द्रविरहवेदना' 'श्री ५ वीरेन्द्रराज्याभिषेकः' इति च लघुनी काव्ये रचिते। एष राजतन्त्रस्य पक्षपाती सुरभारत्याः सेवको वर्तते। सरलसंस्कृतभाषायां कह्लणप्रणीतस्य राजतरङ्गिण्याः शैल्यां रचितेऽस्मिन् ऐतिहासिकमहाकाव्ये कविना विंशतिसङ्ख्यकानां शाहवंशीयानां राज्ञां वर्णनं कृतम्। व्याकरणशास्त्रमर्मज्ञेन कविना महाकाव्येऽस्मिन् काव्यकलायाः प्रचुरः प्रयोगो विहितः। इतिहासस्य यथार्थपरकस्येतिवृत्तस्य प्रस्तुतीकरणे चास्य महाकाव्यस्य पृथग् वैशिष्ट्यं प्रतिभाति (ढकालः, २०५५, पृ. ४)।

**श्रीकृष्णचरितामृतमहाकाव्यम्**

काष्ठमण्डपनिवासिना कृष्णप्रसादघिमिरेमहोदयेन प्रणीतं श्रीकृष्णचरितामृतमहाकाव्यं २०२८ तमे वैक्रमाब्दे प्रकाशितमभूत्। श्रीमद्भागवतस्य दशमस्कन्धस्य पूर्वार्द्धस्थितानि कथावस्तुन्यवलम्ब्याष्टपञ्चाशत्सर्गेषु संरचितमिदं महाकाव्यं संस्कृतवाङ्मयस्यापूर्वं काव्यरत्नमस्ति। अस्मिन् महाकाव्ये कविरसौ पूर्णावतारस्य भगवतः श्रीकृष्णस्य विविधां लीलां महिमानञ्च निरूपयति। महाकाव्यमिदं भारतीयोपमहाद्वीपस्थैर्मनीषीभिर्महापुरुषैश्च नितरां संस्तुतम्, तथैव भारतीयेन महिमशालिना राष्ट्रपतिना वी.वी. गिरिणा समभिनन्दितञ्चेति (ढकालः, २०५५, पृ. ४)।

**ययातिचरितमहाकाव्यम्**

महाकविना कृष्णप्रसादघिमिरेमहोदयेनैवापरं ययातिचरिताभिधेयं महाकाव्यं प्रणीतमस्ति। महाकाव्येऽस्मिन् महाभारतीयं श्रीमद्भागवतीयञ्च ययातिचरितमनुसृत्य चन्द्रवंशोद्भवस्य श्रीकृष्णपूर्वजस्य राज्ञो ययातेर्महिममण्डितं चरितं वर्णितमस्ति। २०२९ तमे वैक्रमाब्दे प्रणीतमेकोनविंशतिसर्गात्मकमेतन्महाकाव्यं धर्मार्थकाममोक्षरूपपुरुषार्थचतुष्टयप्रतिपादकं वर्तते। (ढकालः, २०५५, पृ. ४ )

**नाचिकेतसं महाकाव्यम्**

कृष्णप्रसादघिमिरेमहोदयेनैव विरचितमष्टाविंशतिसङ्ख्यकैः सर्गैः समन्वितं नाचिकेतसं महाकाव्यं २०३१ तमे वैक्रमाब्दे प्रकाशितमस्ति। एतत् कठोपनिषद्याधारितं दार्शनिकं महाकाव्यमस्ति। उपनिषत्साहित्ये प्रसिद्धस्य 'नचिकेता' इत्यस्यैतिवृत्तमेवास्य महाकाव्यस्य विषयवस्तु वर्तते। एतत् महाकाव्यं कठोपनिषदः काव्यात्मकं रूपान्तरणमस्ति। अत्र नचिकेतसो ज्ञानविज्ञानोज्ज्वलं लोकपावनं जीवनं व्याख्यातम्, तथैवात्राध्यात्मवादस्य हृद्यं स्वरूपं प्रकाशितमस्ति। 'नचिकेता' इत्यस्य महत्ताभिव्यञ्जकस्यास्य महाकाव्यस्य प्रमुखं लक्ष्यं तु सकलानामुपनिषदां प्रमुखप्रतिपाद्यविषयभूतस्य ब्रह्मतत्त्वस्य निरूपणमेव वर्तते (ढकालः, २०५५, पृ. ४ )

**गौरीगिरीशं महाकाव्यम्**

कृष्णप्रसादघिमिरेमहोदयेन रचितं नवसर्गात्मकं गौरीगिरीशं महाकाव्यं २०४४ तमे वैक्रमाब्दे प्रकाशितं विद्यते। गौरीशंकरविविधलीलाविलसितमिदं गीतिप्रधानमहाकाव्यमस्ति। शिवपुराणाश्रितमिदं महाकाव्यं नानाविधरागरागिणीमयं शृङ्गाररसप्रधानमस्ति। महाकाव्यमिदं महाकवेः कालिदासस्य कुमारसम्भवमहाकाव्यस्य शैल्यां रचितं वर्तते। एतन्मनोहरं भावगभीरं गेयात्मकञ्च महाकाव्यमस्ति (ढकालः, २०५५, पृ.४ )

**नेपालसाम्राज्योदयमहाकाव्यम्**

१९८४ तमे वैक्रमाब्दे नेपालस्य महोत्तरीमण्डले लब्धजनुषा पशुपतिझानाम्ना महाकविना नेपालसाम्राज्योदयमहाकाव्यं प्रणीतमस्ति। काश्यपगोत्रीयः पशुपतिझा ग्रन्थलेखनसम्पादनकार्येणापि परिचितो वर्तते। अध्ययनाध्यापनक्रमे भारतदेशे निवसतानेन स्वजन्मभूमेः स्नेहेन नैपालानां शाहवंशीयानां राज्ञामितिवृत्तं प्रस्तूय महाकाव्यं निर्मितम्। अत्र २०३६ तमस्य वैक्रमाब्दस्य जनमतसङ्ग्रहं यावद् विकसिता घटनावलिः काव्यात्मकरूपेणाभिव्यक्ता वर्तते। पञ्चदशसर्गात्मकमेतदैतिहासिकं महाकाव्यमस्ति। ऐतिहासिकविषयाणां प्राचुर्येऽपि कविनात्र काव्यकलाया मनोहारिता प्रकटीकृता वर्तते (ढकाल:,२०५५, पृ. ८)। अस्य महाकाव्यस्य प्रथमे सर्गे निबद्धं नेपालवर्णनं ग्राम्यजनजीवनस्य यथार्थचित्रणञ्च सहृदयहृदयमाह्लादकमस्ति। अस्य महाकाव्यस्योदाहरणपद्यानि यथा -

तत्सङ्गमोपान्तरतः प्रदेशे तपो विधातुं स्थिरचित्तशक्तिः।
नेनामकः सिद्धमुनिर्महात्मा संयोजयामास मनः समाधौ॥ (२/४)।
तदाशिषा तत्समयस्य भूपोऽभवत् प्रजारञ्जनशक्तियुक्तः।
तेनास्य देशस्य महीप ! नाम जातं हि नेपाल इति प्रसिद्धम्॥ (२/५३)।

**जगदम्बिकावैभवमहाकाव्यम्**

नेपालदेशस्य गुल्मीमण्डले सञ्जातेन भीमकान्तपन्थिना जगदम्बिकावैभवमहाकाव्यं प्रणीतम्। द्वादशसर्गान्वितं जगदम्बिकावैभवं पौराणिकघटनासम्बद्धं महाकाव्यं वर्तते। २०५५ तमे वैक्रमाब्दे प्रकाशितं महाकाव्यमेतद् देवीभागवतपुराणे वर्णितयोः शशिकलासुदर्शनयोश्चरित्रचित्रणे केन्द्रीभूतं वर्तते। अत्र समासविहीनप्रसादगुणमयसुललितपदानां प्रयोगो विद्यते। विश्वनाथीयसाहित्यदर्पणोक्तं महाकाव्यलक्षणमनुसृत्य लिखितेऽस्मिन् महाकाव्ये भगवत्या जगदम्बाया ब्रह्मत्वप्रतिपादनात् शान्तरसोऽङ्गी वर्तते। अस्य महाकाव्यस्यैकमुदाहरणपद्यम् -

मालामनोज्ञकुसुमै रचितापि शीता सा सर्पिणीव विषबिन्दुभिरञ्चतीव।
पूर्णस्य चन्द्रमस एष मयूखवृन्दो मामग्निवद्दहति सुन्दरि ! देहलग्नः॥ (५/३)

**जगदीश्वरवैभवमहाकाव्यम्**

भीमकान्तपन्थिनैव विरचितं जगदीश्वरवैभवमहाकाव्यं २०५५ तमे वैक्रमाब्दे प्रकाशितं विद्यते। श्रीमद्भागवतमहापुराणस्य चतुर्थस्कन्धस्याष्टमाध्यायादारभ्य द्वादशाध्यायं यावद् वर्णितं ध्रुवचरितमनुसृत्य महाकाव्यमिदमष्टसु सर्गेसु निबद्धमस्ति। महाकाव्ये वर्णितस्य ध्रुवस्योदयविषये कारणभूतस्य जगदीश्वरस्य विष्णोर्महिमकथनं काव्ये वर्तते। अत्र दीर्घसमासबन्धरहितानि प्रसादगुणयुतानि पद्यानि सन्ति। प्रतिपाद्ये विषये भागवताद् गृहीतेऽपि काव्यमिदं पूर्णतो मौलिकं वर्तते। अस्य महाकाव्यस्योदाहरणम् -

यो देव: सविताऽखिलस्य जगतो ब्रह्माऽन्यरूपेण यो विष्णु: पालयिता य एव च शिव: संहारको मायया।
यश्चाचक्षुरनन्तदृग् बहुशिरा योऽपाणिपादो जवी वेदैरुक्तमनन्यथैव घटते तस्मै नमो ब्रह्मणे॥ (१/१)

**सत्यसाईचरितं महाकाव्यम्**

खोटाङमण्डले सञ्जातेन माधवभट्टराईमहोदयेन सत्यसाईचरितं महाकाव्यं रचितम्। २०५८ तमे वैक्रमाब्दे प्रकाशितमिदं महाकाव्यं पञ्चदशसर्गात्मकं वर्तते। महाकाव्येऽस्मिन् भारतदेशस्यान्ध्रप्रदेशे जातस्य देशे विदेशे च विस्तीर्णयशसः सत्यसाई इत्याख्यस्य चरित्रं मनोहरशैल्यां प्रस्तुतमस्ति। अत्र बहुविधानां छन्दसां प्रयोगो दृश्यते, तथैव कविः शब्दार्थालङ्काराणां स्वाभाविकसन्निवेशेण पाठकजनमनांसि आह्लादयति। महाकाव्ये प्रकृतेर्विविधानामवस्थानां सान्दर्भिकः प्रयोगो विद्यते। अत्र गद्यकवितानां प्रयोगोऽपि वर्तते, एवञ्च विविधचित्राणां सन्निवेशो दृश्यते। तथैव नेपाली-अङ्ग्रेजीभाषयोश्च विहितेनानुवादेनापि महाकाव्यस्यास्य पृथग् वैशिष्ट्यं ख्याप्यते। अत्र विविधेषु रसेषु सत्स्वपि सत्यसाईविषयकः कवेः रतिर्भाव अङ्गित्वेनास्वाद्यते (पोखरेल, पूर्ववत् : १२०)।

**श्रीविष्णुव्रतामृतम्**

तेह्रथुममण्डले जनिं प्राप्य सुनसरीमण्डलस्य धराननगरनिवासिना लोकनाथलुइँटेलेन श्रीविष्णुव्रतामृतम् महाकाव्यं रचितमस्ति। २०६८ तमे वैक्रमाब्दे प्रकाशितमेतत् महाकाव्यं पञ्चदशसर्गेषु निबद्धमस्ति। विष्णुभक्तिविषयिणीं भागवतीं कथामाधारीकृत्य संरचितेऽस्मिन् महाकाव्ये अनुष्टुप्, इन्द्रवज्रा, उपजातिः, वसन्ततिलका, तोटकम्, शार्दूलविक्रीडितम्, शिखरिणी, मन्दाक्रान्ताप्रभृतीनां छन्दसां गद्यशैल्याश्च प्रयोगो विद्यते। महाकाव्ये भगवतो विष्णोश्चरितस्य वर्णनं प्राप्यते। महाकाव्ये कविना भगवन्तं विष्णुं प्रति प्रकाशिता अगाधा भक्तिः संलक्ष्यते। महाकाव्येऽयत्नसमासादिताः कतिपयाः शब्दार्थालङ्काराश्चावलोक्यन्ते।

**हनूमदयनमहाकाव्यम्**

प्राध्यापकेन विष्णुराज आत्रेयेण विरचितं हनूमदयनमहाकाव्यं २०७१ तमे वैक्रमाब्दे प्रकाशितमस्ति। अञ्यालसेवासमाजकाष्ठमण्डपेन प्रकाशितेऽस्मिन् महाकाव्ये पञ्चदशसर्गा विद्यन्ते। रामायणस्य कथामाधृत्य संरचितेऽस्मिन् महाकाव्ये पवनपुत्रो हनुमान् नायकत्वेन विराजते। अनेन कविना स्कान्द-पद्म-वायु-शिव-ब्रह्मवैवर्तादिषु पुराणेषु प्रतिपादितं हनूमच्चरितं सङ्कलय्य वाल्मीकीय-वासिष्ठाध्यात्मरामायणादिभिः तोलयित्वा काव्यतामापादितम्। महाकाव्यमिदं हनूमद्विषयकदेवादिरतिप्रधानञ्चास्ति। महाकाव्यस्य कथावस्तु पौराणिकहनुमद्दिव्यचरित्रतया- ऽऽश्चर्यमयमद्भुतरसाभिव्यञ्जकं विलसति।

**देवाधिदेवश्रीनीलकण्ठमहाकाव्यम्**

आचार्यपूर्णचन्द्रोपाध्यायढुङ्गेलेन विरचितं देवाधिदेवश्रीनीलकण्ठमहाकाव्यम् २०७८ तमे वैक्रमाब्दे प्रकाशितमस्ति। अस्य महाकाव्यस्य कथा शिवचरित्रमाधृता विद्यते। मुख्यतया शिवमहापुराणमस्य महाकाव्यस्य कथाया मूलं विभाति। महाकाव्यस्यास्य मूलं शिवचरितम्, अत्र शिव एव नायकः। तद्गता भक्तिरेवात्र प्राधान्येनाभिव्यज्यते। समुद्रमथनोत्थमहाविषपानकर्मणा पुराणेषु प्रसिद्धं शिवचरितं कविनात्र प्रकाशितम्। सप्तविंशतिसर्गात्मकं महाकाव्यमेतत् देवाधिदेवश्रीनीलकण्ठस्य स्तुत्यचरितप्रकाशकं विपुलकायं महाकाव्यमस्ति। महाकाव्ये स्वाभाविकतया समायाताः शब्दार्थालङ्काराश्च प्राप्यन्ते। अस्य महाकाव्यस्योदाहरणपद्यम् -

देवाधिदेवशिवरूपमिदं विचित्रं विश्वस्य सर्वविधसौख्यकरं बहुत्रम्।
संहारकञ्च सकलस्य चराचरस्य द्वैविध्यमस्य विवुधस्य विचित्ररूपम्॥ (११/४०)
विचार्य देवाधिपतिर्महेश्वरो जगत्स्थितिं हीदृशमन्तरातमना।
कृपापरस्त्राणसहेऽत्र कर्मणि सुसज्जितो भीषणरूपधारणात्॥ (१४/१७)

**नेपालगौरवं महाकाव्यम्**

प्राध्यापकेन विष्णुप्रसादशर्मादेवकोटामहोदयेन विरचितं नेपालगौरवं महाकाव्यं २०७९ वैक्रमाब्दे प्रकाशितमस्ति। जयतु संस्कृतम् संस्थया प्रकाशितेऽस्मिन् महाकाव्येऽष्टादशसर्गा विद्यन्ते। अत्र कविना परिमलशब्देन सर्गनाम निर्धारितमस्ति। महाकाव्ये नेपालदेशीयानां पृथ्वीनारायणप्रभृतीनां भूपानां नैपालसैनिकानाञ्च वीरताया वर्णनं प्राप्यते। एवमेवात्र महाकाव्येऽस्माकं संस्कारसंस्कृत्योश्च महिमापि प्रकाशिता वर्तते। कविनात्र षोडशसंस्काराणां महत्त्वं विस्तरेण प्रस्तुतमस्ति। कविना गुरोः गोरखनाथस्य चमत्कारपूर्णानि चरित्राण्यपि प्रस्तुतानि सन्ति। नेपालदेशे समुद्भवो भगवान् गौतमबुद्धोऽप्यस्माकं गौरवमस्तीति कविः प्रतिपादयति। पौरस्त्यकाव्यशास्त्रिभिर्विवेचितानि रसालङ्कारध्वनितत्त्वान्यपि यथौचित्यं काव्ये प्रयुक्तानि विद्यन्ते।

**प्रकाशितानि संस्कृतमहाकाव्यानि**

नेपालदेशीयानां कवीनां प्रकाशितानि महाकाव्यानि अधो निर्दिष्टायां तालिकायामपि प्रदर्श्यन्ते -

| क्र.सं. | महाकाव्यलेखकाः | महाकाव्यानि |
|---|---|---|
| १ | वंशमणि शर्मा | हरिकेलिमहाकाव्यम् |
| २ | यज्ञशर्मा सूरि | चन्द्रसम्भवमहाकाव्यम् |

| क्र.सं. | महाकाव्यलेखकाः | महाकाव्यानि |
|---|---|---|
| ३ | सुकृतिदत्त पन्त | कार्तवीर्योदयमहाकाव्यम् |
| ४ | पूर्णप्रसाद ब्राह्मण | सत्यहरिश्चन्द्रमहाकाव्यम् |
| ५ | भरतराज घिमिरे मन्थलीय | महेन्द्रोदयमहाकाव्यम् |
| ६ | हरिप्रसाद आचार्य | गोरक्षशाहवंशमहाकाव्यम् |
| ७ | कृष्णप्रसाद घिमिरे | १. श्रीकृष्णचरितामृतमहाकाव्यम्<br>२. ययातिचरितमहाकाव्यम्<br>३. नाचिकेतसं महाकाव्यम्<br>४. वृत्रवधमहाकाव्यम्<br>५. गौरीगिरीशं महाकाव्यम् |
| ८ | पशुपति झा | नेपालसाम्राज्योदयं महाकाव्यम् |
| ९ | भीमकान्त पन्थी | १. जगदम्बिकावैभवमहाकाव्यम्<br>२. जगदीश्वरवैभवमहाकाव्यम् |
| १० | माधव भट्टराई | सत्यसाईचरितं महाकाव्यम् |
| ११ | लोकनाथ लुइँटेल | श्रीविष्णुव्रतामृतं महाकाव्यम् |
| १२ | आचार्य पूर्णचन्द्र ढुङ्गेल | देवाधिदेवश्रीनीलकण्ठमहाकाव्यम् |
| १३ | विष्णुप्रसाद देवकोटा | नेपालगौरवम् महाकाव्यम् |
| १४ | विष्णुराज आत्रेय | हनूमदयनमहाकाव्यम् |

एवमेव नेपालेऽप्रकाशितानि संस्कृतमहाकाव्यान्यपि दृष्टिपथं समागतानि सन्ति। मल्लकालिकेन कविना काशिनाथशर्मणा यदुवंशमहाकाव्यं १६७५ तमे वैक्रमाब्दे प्रणीतम् । श्रीकृष्णस्य पूर्वजाद् यदोरारभ्य रुक्मिणीविवाहपर्यन्तायां कथायामाधृतमिदं महाकाव्यं रसभावविशिष्टं विविधैरलङ्कारैरलङ्कृतं च वर्तते। दशसर्गात्मकमेतत् महाकाव्यमद्यावधिर्नेपालस्य राष्ट्रियाभिलेखालयस्य ग्रन्थागारे पाण्डुलिपिरूपे सुरक्षितमस्ति (ढकाल, पूर्ववत् , पृ. ४)। एवञ्च धनकुटामण्डले १९७५ तमे वैक्रमाब्दे समुत्पन्नेन माधवप्रसादबरालेन मागधविजयं महाकाव्यं प्रणीतम्। एकविंशतिसर्गात्मकं वीररसप्रधानमेतत् महाकाव्यमद्य यावदप्रकाशितमस्ति। काव्यमिदं विविधपुराणेतिहाससम्बद्धां घटनां काव्यात्मरूपेण प्रतिपादयति।

महाकाव्यमिदमनुप्रासोपमारूपकादिशब्दार्थालङ्कारैरलङ्कृतं प्रसादप्रधानैर्गुणैर्युक्तं भावपक्षतः कलापक्षतश्च महत्त्वपूर्णमस्ति (घिमिरे, २०६७, ५२-६२)। कृष्णप्रसादघिमिरेमहोदयेन श्रीमद्भागवतादिपुराणेषु वर्णितं वृत्रासुरवधसम्बद्धमितिवृत्तमादाय वृत्रवधमहाकाव्यं प्रणीतम्। पञ्चसर्गात्मकं महाकाव्यमिदमद्य यावदप्रकाशितम् (ढकालः, पूर्ववत्, १०)। एवमेव पाल्पामण्डले समुत्पन्नेन वेणीमाधवढकालेन पृथूदयमहाकाव्यं प्रणीतमस्ति। अष्टादशसर्गात्मकं शृङ्गाररसप्रधानमेतन्महाकाव्यं विविधैरलङ्कारैरलङ्कृतं वर्तते। पृथुलाकारस्य पृथूदयमहाकाव्यस्य त्रिण्येव सर्गाणि प्रकाशितानि दृश्यन्ते।

**संस्कृतवाङ्मयप्रवर्द्धने नैपालसंस्कृतमहाकाव्यानामवदानम्**

संस्कृतवाङ्मयप्रवर्द्धने नेपालीमहाकविभिर्विरचितानामेतेषां महाकाव्यानां महती भूमिका वर्तते। एतेषां संस्कृतमहाकाव्यानामवदानं बिन्दुरूपेणाधो निर्देशिताः सन्ति।

१. विश्वसंस्कृतवाङ्मयं समृद्धं विधातुं नैपालसंस्कृतमहाकाव्यानि सहाय्यसिद्धानि सन्ति।
२. नैपालमहाकाव्यैः नगरे नगरे ग्रामे ग्रामे च संस्कृतभाषाया महिमा विस्तारिता।
३. ये जनाः संस्कृतं मृतभाषां कथयन्ति तान् प्रति नैपालसंस्कृतमहाकाव्यैः भाषैषा स्वस्थरूपेण जीवितास्तीति प्रत्युत्तरं दत्तम्।
४. हरिकेलि-चन्द्रसम्भव-कार्तवीर्योदय-सत्यहरिश्चन्द्र-श्रीकृष्णचरितामृत-जगदम्बिकावैभवप्रभृतिभिर्महाकाव्यैः पौराणिकी कथा जनसमक्षं सरसतया कलात्मकरूपेण च प्रस्तुता।
५. महेन्द्रोदय-नेपालसाम्राज्योदय-नेपालगौरवसदृशैर्महाकाव्यैर्नेपालदेशस्यैतिहासिकी घटना, अत्रत्या सामाजिकी सांस्कृतिकी प्राकृतिकी अवस्था च प्रकाशिता।
६. कृष्णप्रसादघिमिरेमहोदयस्य कतिपयैर्महाकाव्यैरुपनिषदि विद्यमानं दार्शनिकं चिन्तनमपि प्रकाशितमस्ति।
७. जनमनांसि धार्मिकीमाध्यात्मिकीं च भावनां प्रवर्द्धयितुमेतानि नैपालसंस्कृतमहाकाव्यानि प्रेरणादायीनि सन्ति।
८. नैपालसंस्कृतमहाकाव्यानां विविधविषयमवलम्ब्य संस्कृतशोधार्थिनः विद्यावारिधिपर्यन्तानामनुसन्धानं क्रियमाणाः सन्ति, एतदपि गौरवस्य विषयः।
९. नेपालसंस्कृतविश्वविद्यालयस्य द्वादशाधिकेषु सर्वकारीयविद्यापीठेषु पाठ्यक्रमे संयोज्य नैपालसंस्कृतमहाकाव्यानि पाठ्यन्ते, अनेनापि संस्कृतभाषायाः विकासो विस्तारश्च जातः।
१०. भामह-दण्डि-मम्मट-विश्वनाथादिभिः काव्यशास्त्रिभिः प्रतिपादितानां काव्यसिद्धान्तानुसारेण विरचितान्येतानि नैपालसंस्कृतमहाकाव्यानि गुणात्मकदृष्ट्या च महत्त्वाधायकानि विद्यन्ते।
११. बिन्दुभिः सिन्धुः सञ्जायत इति कथनानुसारेणाल्पसङ्ख्यकैरपि नैपालसंस्कृतमहाकाव्यैः संस्कृतवाङ्मयप्रवर्द्धने महद्योगदानं प्रदत्तम्।

**निष्कर्षः**

एतानि महाकाव्यानि भामहविश्वनाथादिभिः प्रस्तुतं महाकाव्यलक्षणमनुसृत्य लिखितानि सन्ति। भामह-रुद्रट-मम्मट-विश्वनाथादिभिः काव्यशास्त्रिभिः महाकाव्यस्यावश्यकानि तत्त्वानि प्रतिपादितानि दृश्यन्ते। एभि आचार्यैः कवेर्नाम्ना, विषयवस्तुनो नाम्ना, नायकस्य नाम्ना च महाकाव्यस्य शीर्षकं निर्धार्यत इति प्रतिपादितम्। एवञ्च चतुर्वर्गेषु मध्ये महाकाव्ये कस्यचिदेकस्य प्रयोजनस्यावश्यकता स्वीकृता। महाकाव्यस्य प्रारम्भेऽपि मङ्गलाचरणं विधीयते। एवमेव महाकाव्ये ऐतिहासिकं वैदिकं पौराणिकं सामाजिकं काल्पनिकञ्च कथावस्तु प्रयोक्तुं शक्यते। महाकाव्ये नातिदीर्घा नातिह्स्वा अष्टाधिकानां सर्गाणां व्यवस्था दरीदृश्यते। काव्यशास्त्रिणो महाकाव्ये धीरोदात्तादिसर्वगुणसम्पन्नस्य नायकस्य वर्णनमपेक्षन्ते। एवमेव शृङ्गारवीरशान्तेष्वन्यतमस्याङ्गित्वमावश्यकं भवति। महाकाव्ये प्रतिसर्गमेकमेव छन्दः प्रयोक्तव्यम्, सर्गसमाप्तौ छन्दःपरिवर्तनमावश्यकम्। महाकाव्ये नगरार्णवशैलर्तुचन्द्रार्कोदयोद्यानसलिलक्रीडामधुपान-रतोत्सवविप्रलम्भविवाहकुमारोदय मन्त्रदूतप्रयाणाजि-नायकाभ्युदयानां प्रसङ्गानुसारं वर्णनस्यावश्यकता दर्शिता। एतेषां महाकाव्यसिद्धान्तानामभिप्रायानुसारेणैव नेपालदेशे संस्कृतमहाकाव्यानि विरचितानि लक्ष्यन्ते।

नैपालसंस्कृतमहाकाव्यपरम्परायां वंशमणेर्हरिकेलिमहाकाव्यस्य, सुकृतिदत्तपन्तस्य कार्तवीर्योदयमहाकाव्यस्य च काव्यकलादृष्ट्या उत्कृष्टं स्थानं वर्तते, एतानि महाकाव्यानि भारतीयसंस्कृतमहाकाव्यैः सह प्रतिस्पर्धीन्यपि सन्ति। नैपालसंस्कृतमहाकाव्यानां विषयवस्तु विविधक्षेत्रसम्बद्धं वर्तते। अधिकानां महाकाव्यानां कथावस्तु पुराणेतिहाससम्बद्धं दृश्यते। सामाजिकक्षेत्रे लब्धप्रतिष्ठस्य सज्जनस्य विषये रचितानि महाकाव्यान्यपि दृश्यन्ते। ऐतिहासिक-पौराणिक-विषयवस्तून्यपि कविप्रतिभया वर्णनचातुर्येण चमत्कारितया प्रस्तुतानि सन्ति। एभिर्महाकाव्यैस्तात्कालिकसामाजिकजनजीवनस्य चित्रणमपि प्रस्तुतं विद्यते। आदर्शसमाजनिर्मित्यै नैपालसंस्कृतमहाकाव्यानि नूनं सहायकानि सिद्ध्यन्ति ।

## सन्दर्भ सामग्री

अधिकारी, जीवन (२०६६), यदुवंशमहाकाव्यको साहित्यिक वैशिष्ट्य, *प्रज्ञाप्रवाहः* (१/१, पृ. ९२-१०१)।
आत्रेयः, विष्णुराजः (२०७१), *हनूमदयनमहाकाव्यम्*, अर्ज्यालसेवासमाजः।
उपाध्यायः, माधवशरणः (२०५५), सुकृतिदत्तपन्तदर्शितसरण्या संज्ञासूत्रत्वम्, *ऋतम्भरा* (३/५, पृ. १७)।
कोइराला, गुरुप्रसादः (२०७५), कवेर्माधवस्य कृतित्वपरिशीलनम्, *गवेषणा* (४/४, पृ. १२)।
कौडिन्यायनः, शिवराजाचार्यः (२०४८), *कतिपयनैपालकसंस्कृतग्रन्थकारपरिचयः*, देवी आचार्यानी।
घिमिरे, रमेश (२०६७), माधववरालप्रणीतस्य मागधविजयमहाकाव्यस्य सङ्क्षिप्तं समीक्षणम्, *निष्ठा* (१/१)।
झाः, पशुपतिः (सन् १९८०), *नेपालसाम्राज्योदयम्,* सीतादेवी झा।
ढकालः, वेणीमाधवः (२०५५), नेपालस्य संस्कृतमहाकाव्यपरम्पराया दिग्दर्शनम्, *मर्यादा*, वाल्मीकिविद्यापीठम्।
ढुङ्गेलः, पूर्णचन्द्रः (२०७८), *देवाधिदेवश्रीनीलकण्ठमहाकाव्यम्*, सनातन प्रेस।
पन्त, सुकृतिदत्त (२०५१), *कार्तवीर्योदयमहाकाव्यम्* (सम्पा.डा.स्वामी प्रपन्नाचार्य), नेपाल राजकीय प्रज्ञा प्रतिष्ठान।
पन्थी, भीमकान्त (२०५५), *जगदीश्वरवैभवम्* , डा.लक्ष्मीकान्त पन्थी।
..............(२०५६), *जगदम्बिकावैभवम्*, डा. लक्ष्मीकान्त पन्थी।
पूर्णप्रसादः ब्राह्मणः (२००७), *सत्यहरिश्चन्द्रम्*, सर्वकारस्य संस्कृतिविभागः।
पोखरेल, नुरापति (२०६६), नेपालमा संस्कृत महाकाव्य परम्परा, *प्रभा* (२०/ १०), पिण्डेश्वर विद्यापीठ।
भट्टराई, माधव (२०५५), संस्कृते महाकाव्यनिर्माणस्य परम्परा, ऋतम्भरा (३/ ५)।
भट्ट, विद्यानाथ उपाध्यायः (२०६९), कार्तवीर्योदयमकरन्दस्य अन्तर्वस्तुवीक्षणम्, *कार्तवीर्योदयमकरन्द*, विद्यार्थी पुस्तक भण्डार।
योगी नरहरिनाथः (२०१७), महेन्द्रोदयपरिचयः, *महेन्द्रोदयः*, दुर्गाघाट।
लुइँटेल, लोकनाथ (२०६८), *श्रीविष्णुव्रतामृतम्*, लोकनाथ लुइँटेल।
शर्मा, वंशमणिः (२०५१), *हरिकेलिमहाकाव्यम्* (सम्पा.वेणीमाधव ढकाल), महेन्द्र संस्कृत विश्वविद्यालय।